॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय १००

अध्यर्धयोजनं गत्वा नदीं पश्चान्मुखाश्रिताम् ।
सरयूं पुण्यसलिलां ददर्श रघुनन्दनः ॥ १॥

अथ तस्मिन्मुहूर्ते तु ब्रह्मा लोकपितामहः ।
सर्वैः परिवृतो देवैरृषिभिश्च महात्मभिः ॥ २॥

आययौ यत्र काकुत्स्थः स्वर्गाय समुपस्थितः ।
विमानशतकोटीभिर्दिव्याभिरभिसंवृतः ॥ ३॥

पपात पुष्पवृष्टिश्च वायुमुक्ता महौघवत् ॥ ४॥

तस्मिंस्तूर्यशताकीर्णे गन्धर्वाप्सरसङ्कुले ।
सरयूसलिलं रामः पद्भ्यां समुपचक्रमे ॥ ५॥

ततः पितामहो वाणीमन्तरिक्षादभाषत ।
आगच्छ विष्णो भद्रं ते दिष्ट्या प्राप्तोऽसि राघव ॥ ६॥

भ्रातृभिः सह देवाभैः प्रविशस्व स्वकां तनुम् ।
वैष्णवीं तां महातेजस्तदाकाशं सनातनम् ॥ ७॥

त्वं हि लोकगतिर्देव न त्वां के चित्प्रजानते ।
ऋते मायां विशालाक्ष तव पूर्वपरिग्रहाम् ॥ ८॥

त्वमचिन्त्यं महद्भूतमक्षयं सर्वसङ्ग्रहम् ।
यामिच्छसि महातेजस्तां तनुं प्रविश स्वयम् ॥ ९॥

पितामहवचः श्रुत्वा विनिश्चित्य महामतिः ।
विवेश वैष्णवं तेजः सशरीरः सहानुजः ॥ १०॥

ततो विष्णुगतं देवं पूजयन्ति स्म देवताः ।
साध्या मरुद्गणाश्चैव सेन्द्राः साग्निपुरोगमाः ॥ ११॥

ये च दिव्या ऋषिगणा गन्धर्वाप्सरसश्च याः ।
सुपर्णनागयक्षाश्च दैत्यदानवराक्षसाः ॥ १२॥

सर्वं हृष्टं प्रमुदितं सर्वं पूर्णमनोरथम् ।
साधु साध्विति तत्सर्वं त्रिदिवं गतकल्मषम् ॥ १३॥

अथ विष्णुर्महातेजाः पितामहमुवाच ह ।
एषां लोकाञ्जनौघानां दातुमर्हसि सुव्रत ॥ १४॥

इमे हि सर्वे स्नेहान्मामनुयाता मनस्विनः ।
भक्ता भाजयितव्याश्च त्यक्तात्मानश्च मत्कृते ॥ १५॥

तच्छ्रुत्वा विष्णुवचनं ब्रह्मा लोकगुरुः प्रभुः ।
लोकान्सान्तानिकान्नाम यास्यन्तीमे समागताः ॥ १६॥

यच्च तिर्यग्गतं किं चिद्रामामेवानुचिन्तयत् ।
प्राणांस्त्यक्ष्यति भक्त्या वै सन्ताने तु निवत्स्यति ।
सर्वैरेव गुणैर्युक्ते ब्रह्मलोकादनन्तरे ॥ १७॥

वानराश्च स्वकां योनिमृक्षाश्चैव तथा ययुः ।
येभ्यो विनिःसृता ये ये सुरादिभ्यः सुसम्भवाः ॥ १८॥

ऋषिभ्यो नागयक्षेभ्यस्तांस्तानेव प्रपेदिरे ।
तथोक्तवति देवेशे गोप्रतारमुपागताः ॥ १९॥

भेजिरे सरयूं सर्वे हर्षपूर्णाश्रुविक्लवाः ।
अवगाह्य जलं यो यः प्राणी ह्यासीत्प्रहृष्टवत् ॥ २०॥

मानुषं देहमुत्सृज्य विमानं सोऽध्यरोहत ।
तिर्यग्योनिगताश्चापि सम्प्राप्ताः सरयूजलम् ॥ २१॥

दिव्या दिव्येन वपुषा देवा दीप्ता इवाभवन् ।
गत्वा तु सरयूतोयं स्थावराणि चराणि च ॥ २२॥

प्राप्य तत्तोयविक्लेदं देवलोकमुपागमन् ।
देवानां यस्य या योनिर्वानरा ऋष्क राक्षसाः ॥ २३॥

तामेव विविशुः सर्वे देवान्निक्षिप्य चाम्भसि ।
तथा स्वर्गगतं सर्वं कृत्वा लोकगुरुर्दिवम् ॥ २४॥

जगाम त्रिदशैः सार्धं हृष्टैर्हृष्टो महामतिः ॥ २५॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com